International Journal of Applied Research 2018; 4(1): 516-518




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(1): 516-518
www.allresearchjournal.com
Received: 24-11-2017
Accepted: 27-12-2017

**डॉ० लीला बिहारी चौधरी**
व्याकरणाचार्य शिक्षाशास्त्री, लगमा (रामभद्रपुर), लोहनारोड, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० लीला बिहारी चौधरी**
व्याकरणाचार्य शिक्षाशास्त्री
ग्राम+पो0–लगमा (रामभद्रपुर)
भाया–लोहनारोड, दरभंगा, बिहार, भारत

# भारतीय संस्कृति संरक्षणेविहारस्यावदानम्

**डॉ० लीला बिहारी चौधरी**

**सारांशः**
समेषां ''संस्कृति'' परिशीलने इत्थं निर्णायकत्वेन निश्चियते यद् भारतीय संस्कृति एव दिव्या अनुकूलतमा ग्राह्या च विद्यते। अतोत्र विषयमुम्पल्लवीकृत्य अस्मिन्नालेखे सारसंस्तुति प्रस्तुता। तत्रापि क्षेत्र–क्षेत्रान्तर रूपेण विहारस्य स्थानं सर्वप्रथम मिति।

**प्रस्तावनाः**
अध्यात्मविद्याविशारदातपः पूतमानसाऽयं भारतभूमिः महतीप्रतिष्ठया प्रख्यापिता। तत्र देवा अपि मूहुर्मूहुर्गीतं गायन्ति यदीयं धन्याभारतभूमिः यत्र जनाः स्वकीयजन्मन पुण्यं लेभिरे। तदुक्तम्–

> गायन्ति देवा किलगीतकानि,
> धन्यास्तुते भारतभूमिभागे।।[1]

अत्रापि च जन्मजन्मान्तरीयपुण्यवशादेव भारते तत्रापि जगज्जननीजानकीजन्मभूमिर्यत्र संस्कृतं गीयन्ते। तद्यथा–

> स्वतः प्रमाणं परतः प्रमाणं शुकाङ्गणानां गिरोगिरन्ति।
> शिष्योपशिष्यमुपगीयमानं भवेद्धि तन्मण्डन मिश्रधामः।।[2]
> एवमेवबालोहं जगदानन्द........वर्णयामि जगहायम।

संस्कृतमेव भारतस्य प्रतिष्ठाया स्वाभिमतश्चापि प्रतीकं विद्यते। एतेन संस्कृतस्यस संस्कृतेश्च भारतीयात्मा प्राणो वा वक्तुं शक्यते। इयमेवभारतीयसंस्कृतौ प्रतिष्ठा विलोक्यते। तदुच्यते। जातकानां षोडशसंस्काराश्च अस्यामेव विलोक्यत। तदुच्यते।[3]
अस्ति, जायते, वर्धते, विपरिणमते, अपक्षीयते, विनश्यतीति। इत्यादयषड्भाव विकाराश्चास्यामेव विलोक्यते। कर्मकाण्डे पूजापाठादावपि इयमेव संस्कृतभाषा प्रचलिता। अथापीयमेव सभ्यतासंस्कृतेश्च जननी अस्ति। संस्कृतभाषा विश्वभाषासु प्राचीनभाषा विद्यते। विश्वपुस्तकालयेषु मानवमात्रस्य प्राचीनतमः इतिहासः संस्कृत भाषायामेव सुरक्षितोस्ति। इयं संस्कृतभाषा विश्वभाषासु बहूनां भाषाणां जननी विद्यते। वस्तुतस्तु[4] ''संस्कृतं' 8 नाम भारतीय शिक्षा संस्कार संवाहिनी दिव्याभाषा महामहर्षिभिर्महितापि दार्शनिक शिरोमणिभिः याज्ञवल्क्यकपिलकणाद गौतमगंगेशपाणिनिकात्ययायन पतञ्जलिप्रभृतिभिरूत्तमाङ्गे नान्यर्थितापि व्यासवाल्मीकिभासभारविभवभूतिकालिदास भर्तृहरिहर्षजनकशतानन्दकुमारिल–मण्डनोदयनहलायुध वाचस्पतिज्योतिरीश्वर विद्यापतिगोविन्दभ–वनार्थशंकरभोजहर्षनाथविश्वनाथ गंगानाथार्य्यभट्टचाणक्याम्बिका–दत्तव्यासरामावतारबच्चाजीझाजयदेवादिभिरनर्ध्यानर्ध्य–रत्नराशिभिपूजितपदपाथो जाप्यमरसरस्वती साम्प्रतं समय विपर्य्येण बाध्यात्मिकज्ञानादिविषयेष्वनत्यादरेणवा प्रतीच्यसभ्यताविज्ञानादिचाकचक्येणास्माकं चमत्कृतलोचनतया वा सम्यङ्नाद्रियते।
वास्तविकन्तु[5] –विहारराज्यमेव भारतवर्षस्य कण्ठाहाररूपं पर्वतराजाद हिमवतोदक्षिणदिशायां देवनदीमुभयतः स्थितं नैसर्गिकीभिः सम्पद्भिरलङ्कृतम्। गंगां वामतो दक्षिणतश्चानेकाः सदानीरा नद्यो सर्वदा पूरयन्ति। एतस्य राज्यस्य प्रतिष्ठिता मेधाविनो लेखका कवयश्च सुरसरस्वती सेवायां समर्पितवयसोऽभूवन। जीवनस्य चतुर्पुरुषार्थेषु धर्मार्थकाममोक्षाख्येषु स्वररचनाभिविहार वासिनः प्राचीनालेखका महतीख्यातिमवाप्नुवन। धर्मशास्त्रे याज्ञवल्क्यस्मृतिः अर्थशास्त्रे कौटिल्येन चेतमर्थशास्त्रम्, कामशास्त्रे पाटलिपुत्रमेवावस्थितेन वात्स्यायनेन रचितं कामशास्त्रम् मोक्षशास्त्रे च गौतमस्य न्यायदर्शनं याज्ञवल्क्यस्य च वृहदारण्यकोपनिषदिवर्तमानं ब्रह्मतत्त्वचिन्तनं स च चिन्तनकौशलं प्रकटयति।

वृहदारण्यकोपनिषदस्तृतीयाध्याये जनकस्यसभायां याज्ञवल्क्य एकाक्येव वहूनां विदुषां प्रश्नान् सफलत्तमुत्तरं ददाति। तत्र गार्गी वाचक्नवी नामशास्त्रोर्थकुशला पण्डितापि वर्तते यां याज्ञवक्ल्य अतिप्रश्नान्निवारयति। मिथिलायां विदेहाभिधानेपि प्रसिद्वायां गृहे–गृहे सरस्वतीनर्तनमिति पारिजातहरणकाव्येकविकर्णपूरोदर्शयति।

जानकीजननभूमिरीक्ष्यतामम्बुजाक्षि मिथिलेयमग्रत
यत्र विरावदनेषु दर्पितानृत्यति प्रतिगृहं सरस्वती।।

अतो मिथिलायामेवमाहिष्मतीग्रामे (सम्प्रतिमहिषीतिज्ञाते) कदाचिन्मण्डनमिश्रेण मीमांसादर्शनाकुलने समशंकराचार्य्यस्यशास्त्रार्थो बभूव। मण्डनमिश्रपत्नीभारतीचात्र निर्णायिकासीदिति जनश्रुतिः। अनेके मीमांसाग्रन्थाः मण्डनकृतास्समुपलभ्यन्ते। न्यायदर्शनस्य सूत्रकारो गौतमो विहारस्यैव। इदानीमपि एतद्दर्शनक्षपाददर्शनेन विज्ञायते। दर्शनस्यास्यापि प्राचीनत्वेन गौतमस्यैव स्थानम्। नूतनत्वेन गंगेशोपाध्याया संस्मर्यन्ते। इतोपि बौद्धधर्माक्रान्ताः जातास्तदानीं दर्शने तत्कालीना महामान्याः दर्शनस्यास्यधुरन्धराः करियन निवासिन उदयनाचार्य्याः मिथिलाभिजनाः आत्मतत्वविवेकम्, न्यायकुसुमाञ्जलिम्, न्यायटीकापरिशुद्धिं चेतिग्रन्थत्रयं रचितवन्तस्स्वमतं स्थापितवन्तश्च।

विहारे धर्मसंस्थापकेषु महात्माबुद्धस्य आभ्युदये सति नालान्दाविद्यापीठं बहुकालं मनुते बौद्धदर्शन धर्मदर्शनाध्ययनकेन्द्रं बभूव। यत्राचार्य्याः नानाशास्त्रेवु कुशलामहायानसंस्कृतग्रन्थान रचितवन्तः। तेन सम्पूर्णे विश्वं एतेषांमहानुभावानां यशश्चकास्ति। एवमेव जैनधर्माभ्युदये सति अस्मिन्नन्तिमो गुरूं महोदयाः सङताः। इमेपि विहारस्य जैनधर्मस्यापि अन्तिमयुग पुरुषा अभूवन्। तद्दुत्तरम् शोणनदस्योपतीरं स्थितस्यप्रीतिकूटग्रामस्याभिजनो बाणभट्टो महान् गद्यकारो बभूव। तस्य हर्षचरितं कादम्वरीचेति गद्य काव्यद्वयं संस्कृत गद्यरचनायाः कीतिस्स्तम्भरूपेणराजते। एवमेव परम्परागतपाण्डित्येन सह संस्कृतभाषामयसमस्तशास्त्राणां संरक्षणं वर्तते परमावश्यकम्। संस्कृते विनष्टे भारतीयसंस्कृतिर्विनष्टा भविष्यति। तस्यां नष्टायामस्माकं समग्रभारतीयता विनङक्षति। विश्वमानवतायाः सुसंस्कारं कामयमानेयं संस्कृत भाषा विश्वभाषेव सम्मानितास्ति। संस्कृतभाषामाध्यमेन सर्वत्र विदेशेषु वाग्व्यवहारः संभवति। भारते राष्ट्रियैकता सम्पादनार्थञ्च संस्कृतमेव सामर्थ्यमावहति। सम्पूर्णे भारते विदेशेषु च धार्मिकसांस्कृतिककार्याणि संस्कृतभाषैव सम्पाद्यन्ते। प्राचीन भारतीय शास्त्राणि संस्कृतभाषायामेव सुरक्षितानि सन्ति।

संस्कृतन्नाम भारतीयानां ज्ञानसंस्कृतसर्वस्वं विनष्टमेव प्रतीयते। संस्कृतपण्डितानां संस्कृतसमर्थकानाञ्च साहाय्येन संस्कृतसुरक्षार्थं यथाशीघ्रं निश्चितकार्यक्रमानुसारमान्दोलनमपेक्ष्यते। समेऽपि संस्कृतज्ञा आत्मनः सहजमौदासीन्यं दृढ़मेकान्तप्रियतां निरूत्साहायताञ्च विहायाहमकमिकया सदृशं पुरस्कृत्य समेषां ध्रेमावहे विशेषत आत्मन एकयोगक्षेमावहे कर्मणिस्वयं स्फूर्त्या प्रवर्तेरन। अस्माभिरेकमत्येन संस्कृतस्य समुचित विकासार्थमौचित्यपूर्णस्थानलाभार्थञ्च अथापित प्रयत्नो विधेयः।

भौगोलिक–परिवर्तने आधुनिकेऽपि काले च मैथिलसंस्कृतपण्डितास्संस्कृतपरम्परां सम्यक्तया निर्वहन्ति। दरभंगानरेश सम्पोषणात्प्रायशश्चतुश्शतवर्षेभ्यस्संस्कृतभाषायां न्यायव्याकरण साहितयतन्त्रज्योतिषधर्मशास्त्रादिषु परसहस्रग्रन्थारचिताः। येषामुललेखोऽप्यत्रासंभवः। अस्मिन् कोटौ अध्यात्मविद्या विशारदातपपूतमानसागीर्वाणवाणिप्रचारकास्सततस्वाध्याये निरन्तरच्छात्रप्रियाआर्यसुरभारतीसमुपासका विद्यामुञ्चुवो मनीषिणास्सनातनधर्मसमुज्जीविका प्रातस्मरणीया परमहंसस्वरूपा स्वनामधन्या साकेत लोकनिवासिनोजगदीशनारायणब्रह्मचारी जी महाभागा प्राच्यसंस्कृत संस्कृतेश्च जीर्णोद्धारकाः संरक्षकाश्च संजाताः। एतेषामखण्डतपस्यया लगामास्थ जगदीशनारायणब्रह्मचर्य्याश्रमादर्शसंस्कृतमहाविद्यालयादपि अनेके ग्रन्थाः विद्वान्सश्चेदानीमपि विलोक्यन्ते। भारतीयसंस्कृतसंस्कृतेश्च मूलसंरक्षणे महाशयानाम्मूलोपदेशाः विनिदिर्ष्टन्ते।

.

विद्याऽमृतमश्नुते।
साव विद्याया विमुक्तये
श्रुतिमुलोधर्मः।
धर्मोविश्वस्य.........
स चतुरः..............
परमेश्वरः प्रजाः...........धर्मदपि
चोदनालक्षणोर्थोधर्मः
श्रेयसिद्धि..............
श्रुतिस्मृतिः सदाचारः स्वस्यच प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाधर्मस्य लक्षणम्।
विद्याहवै ब्राह्मणमाजगाम..........
उत्तिष्ठत जाग्रत..............
प्रथमेवयसि.......................
ज्ञानं तृतीयं तनुजस्यनेत्रम्..........
मनुष्यरूपेण मृगाश्चरन्ति
श्रद्धावान् लभतोज्ञानम्।
स्तोमा........... मृत्योमडिमृतंगमय
किं किं न साधयति कल्पलतेव विद्या।
विद्या विहीनः पशुः
आनोभद्राः कृतवो यन्तु
योगेन चित्तस्य पदेन वाचा
धर्मेण हीना पशुभिस्समानाः
विना महत्पाद रजोभिावेकम्

अतोऽत्र विहारराज्यस्याध्यात्मिक सौभाग्यं यथा विद्यते, न तथा अन्यराज्यानाम्। यस्मिन–कस्मिन्नपि क्षेत्रे यदि पश्यामश्चेद विना विहारं भारतं शुन्यमेव। अर्थाद् भारतवर्षस्य सम्पूर्णतायाः मूलबीजं विहारराज्यमेव। तदुवतम् मयां स्वकीय निमित्तं हिन्दीपद्यम्।

**निष्कर्षः**

ऐ भारत तेरे गोद में याज्ञवल्क्यकपिलकणादगौतमादि सपूत दिये है, आज तक का इतिहास पलट के देख विहार ने अपनी बहुमूल्य हार दिये हैं। अरे ओ भारत तुम मुझसे कदम से कदम मिला करके देख कितने भण्डाहार भरे है। अन्यथा विवशतावश भी तुम्हारे सर्वस्व को गर्भाधान किये है।

!!इति शम्!!

**सन्दर्भ सूची निम्नाङ्किकतास्सन्ति**


1. विष्णपुराणम् (02.03.24)
2. भारतीय इतिहासः
3. निरूक्तम् (प्रथमकाण्डम)
4. शिक्षाप्रसन्नम्।
5. कौस्तूभ
6. पारिजातहरणकाव्य–27.59
7. यजुर्वेदं
8. आदिशंकराचार्य
9. धर्मं परमंवदन्ति (तै०आ०–10/63)
10. सः चतुरः ........तस्माधर्मस्त वरं नास्ति (वा०ब्रा०–3/4)
11. परमेश्वरः प्रजाः (वा०ब्रा०)
12. जै० द०
13. वै० द० (शंकर मिश्रेण विलिखितः)
14. म० स्मृति–02
15. नि० नि०

16. क० द०
17. सिद्धान्तकौमुदी+मनु०–1
18. शिक्षायाः समाजिक दार्शनिक आधारश्च।
19. भर्तृहरिशतनम्।
20. श्रीमद्भगवदगीता (अ०–13)
21. योगसूत्रम्।